# जयपुरस्थकेन्द्रीयसंस्कृतविश्वविद्यालय-निर्वाणविश्वविद्यालययोः संयुक्ततत्त्वावधाने राष्ट्रियशैक्षिकपरिसंवादः
## (NATIONAL EDUCATIONAL SYMPOSIA)
## राष्ट्रियशैक्षिकपरिसंवादस्यायोजनम्


जनवरीमासस्य सप्तदशदिनाङ्कतः एकोनविंशतिदिनाङ्कं यावत् जयपुरकपरिसरस्य बहूद्देशीयभवनस्य सभागारे केन्द्रीयसंस्कृतविश्वविद्यालयनिर्वाणविश्वविद्यालययोः संयुक्ततत्त्वावधाने त्रिदिवसीयराष्ट्रियराष्ट्रियशैक्षिकपरिसंवादकार्यक्रमः समायोजि। कार्यक्रमेऽस्मिन् बहवः अनुभविनः विद्वांसः संसाधकरूपेण सम्प्राप्ताः। उद्घाटनसत्रे निर्वाणविश्वविद्यालयस्य कुलपतयः प्रो. अरविन्दअग्रवालवर्याः, केन्द्रीयसंस्कृतविश्व-विद्यालयस्य कुलपतयः प्रो.श्रीनिवासवरखेडीवर्याः, जयपुरपरिसरस्य निदेशकाः प्रो.सुदेशकुमारशर्मवर्याः, आधुनिकज्ञानविज्ञानसंकायस्याध्यक्षाः प्रो.वाई.एस.रमेशमहोदयाः परिसंवादस्यास्य संयोजकाः डॉ.डम्बरूधरपतिमहोदयाः, सञ्चालकौ डॉ.कार्तिकभागवताः डॉ.नरेशकुमाराश्च उपस्थिता आसन् । दीपत्वसम्पादनसरस्वतीपूजनादिभिः कार्यक्रमस्य शुभारम्भोऽभूत् । वेदविभागस्य समन्वयकैः डॉ.सुधाकरमिश्रैः मङ्गलमाचरितम्। भारतीयज्ञानप्रणाल्याः क्रियान्वयने उपहुतयः काः भवन्ति ? तासां समाधानं किं भवेत् ? कथञ्च क्रियान्वयनं स्यादिति विषयाः डॉ.डम्बरूधरपतिमहोदयैरुपदिष्टाः। प्रो.वाई.एस.रमेशवर्यैः परिसंवादस्यानेकानि विचारणीयांशानि प्राकाशितानि। निर्वाणविश्वविद्यालयस्य कुलपतयः प्रो.अरविन्दअग्रवालवर्याः संस्कृतस्य वर्तमानपरिप्रेक्ष्ये आवश्यकतां भावपूर्णवचोभिः प्रतिपादितवन्तः । केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतभिः प्रो.श्रीनिवासवरखेडीवर्यैः राष्ट्रियशिक्षानीतौ विषयः सङ्गतिः संस्कृताधृता कथं स्यादिति प्रतिपाद्य तत्र केन्द्रीयविश्वविद्यालयशब्दे केन्द्रीयशब्दस्योपयोगिता तदैव भवति यदा सर्वत्र केन्द्रे सर्वेषु विश्वविद्यालयेषु संस्कृताधारिता शिक्षा स्यात्। सर्वेऽपि विश्वविद्यालयाः संस्कृतविश्वविद्यालयाः स्युः। भविष्यति संस्कृतच्छात्राः भारतीयविद्यासु प्रयोगविज्ञानप्रधानां दृष्टिं सम्पादयेयुरिति सूत्रमवतारितम्। तत्रैव जयपुरपरिसरस्य निदेशकाः प्रो.सुदेशकुमारशर्माणः स्वीयाध्यक्षीयोद्बोधने एडकगत्यनुगमनेन उन्नतिर्न भवति अपितु प्राचीनज्ञानसंरक्षणपुरःसरं शोधः यत्र विधीयते तथैव अस्माकं उन्नतिर्भविता इत्यादिवात्सल्यवचोभिः छात्रान् प्रेरितवन्तः। धन्यवादज्ञापनशान्तिमन्त्रोच्चारणाभ्यां सभायाः सत्रमिदं प्रथमं समाप्तिमगात् ।


17,18,19 जनवरी 2024


जयपुरस्थकेन्द्रीयसंस्कृतविश्वविद्यालय-निर्वाणविश्वविद्यालययोः
संयुक्ततत्त्वावधाने
राष्ट्रियशैक्षिकपरिसंवादः
NATIONAL EDUCATIONAL SYMPOSIA


संयुक्ततत्त्वावधाने


जयपुरस्थकेन्द्रीयसंस्कृतविश्वविद्यालय-निर्वाणविश्वविद्यालययोः
संयुक्ततत्त्वावधाने
राष्ट्रियशैक्षिकपरिसंवादः
17,18,19 जनवरी 2024


जयपुरस्थकेन्द्रीयसंस्कृतविश्वविद्यालय-निर्वाणविश्वविद्यालययोः
संयुक्ततत्वावधाने
राष्ट्रियशैक्षिकपरिसंवादः
GPS Map Camera
Jaipur, Rajasthan, India
Central Sanskrit University Jaipur campus, triveni Nagar Jaipur Rajasthan
Lat 26.864065°
Long 75.777311°
17/01/24 12:01 PM GMT +05:30
Google


जयपुरस्थकेन्द्रीयसंस्कृतविश्वविद्यालय-निर्वाणविश्वविद्यालययोः
संयुक्ततत्वावधाने
राष्ट्रियशैक्षिकपरिसंवादः
GPS Map Camera
Jaipur, Rajasthan, India
Central Sanskrit University Jaipur campus, triveni Nagar Jaipur Rajasthan
Lat 26.864065°
Long 75.777311°
17/01/24 12:02 PM GMT +05:30
Google


जयपुरस्थकेन्द्रीयसंस्कृतविश्वविद्यालय-निर्वाणविश्वविद्यालययोः
राष्ट्रियशैक्षिकपरिसंवादः
GPS Map Camera
Jaipur, Rajasthan, India
Central Sanskrit University Jaipur campus, triveni Nagar Jaipur Rajasthan
Lat 26.864065°
Long 75.777311°
17/01/24 12:02 PM GMT +05:30
Google


GPS Map Camera
Jaipur, Rajasthan, India
Central Sanskrit University Jaipur campus, triveni Nagar Jaipur Rajasthan
Lat 26.864065°
Long 75.777311°
17/01/24 10:46 AM GMT +05:30
Google